अनुक्रमांकः ....................................
निरीक्षकस्य हस्ताक्षरम् ........................

Paper Code
BV 101

# पतञ्जलिविश्वविद्यालयः

**परीक्षा - दिसम्बरमासः - 2017**
**बी. ए. व्याकरणम् (सत्रम् : प्रथमम्)**
**संस्कृतम् (प्रथमपत्रम्)**
**संस्कृत-व्याकरणम् - खण्ड एक (क)**

**समयः - होरात्रयम्** **अधिकतमाङ्काः - 75**

---

**सूचना :** इदं प्रश्नपत्रम् पञ्चसप्तत्यङ्कानां वर्त्तते। इदं अ, ब, स इति त्रिषु खण्डेषु विभक्तमस्ति।

## खण्डः-अ
### (दीर्घोत्तरा प्रश्नाः)

**सूचना :** 'अ' खण्डे पञ्च दीर्घोत्तराः प्रश्नाः दत्ताः सन्ति, तेषु त्रयाणाम् उत्तरं दीयताम् । प्रत्येकं प्रश्नस्य कृते पञ्चदश अङ्काः निर्धारिताः सन्ति। **(3×15=45)**

1. 'इको गुणवृद्धी' इति सूत्रं काशिकानुसारं विविच्यताम्।
2. 'ईदूदेद्द्विवचनं प्रगृह्यम्' इति सूत्रं सोदाहरणं निरूप्यताम्।
3. तदीयम्, गोनर्दीयः अध्यगीष्ट, चिकीर्षति, मुमुषिषति, देभतुः, चिनुतः, कुर्वन्ति, मालीयः इत्येतेषु केचन पञ्चैव प्रयोगाः साधनीयाः।
4. 'ऋॢक्' इति माहेश्वरसूत्रं काशिकामनुसृत्य व्याख्येयम्।
5. 'ऊकालोऽज्झ्रस्वदीर्घप्लुतः' इति सूत्रं स्वग्रन्थानुसारं विविच्यताम्।

## खण्डः-'ब'
### (लघूत्तराः प्रश्नाः)

अयं खण्डः प्रथमद्वितीयोपखण्डरूपेण विभक्तोऽस्ति। प्रत्येकं खण्डे दत्तानां निर्देशाणाम् अनुसरणपूर्वकमेव प्रश्नानां समाधानं करणीयमस्ति।

### (उपखण्डः- प्रथमः)

**सूचना :** प्रथमे उपखण्डे षट् (6) लघूत्तराः प्रश्नाः दत्ताः सन्ति, प्रत्येकं प्रश्नस्य कृते चत्वारः अङ्काः निर्धारिताः सन्ति। तत्र केषाञ्चित् चतुर्णां प्रश्नानामुत्तरं देयम्। **(4×4=16)**

1. 'प्रत्ययस्य लुक्श्लुलुपः इत्यत्र प्रत्ययग्रहणं किमर्थमिति, उपपाद्यताम्।
2. 'प्राक् क्रीताच्छः' इत्यतः प्रारभ्य पञ्चदशसूत्राणि लेख्यानि।
3. 'दीधीवेवीटाम्' इति सूत्रं सोदाहरणं प्रस्तूयताम्।
4. 'न धातुलोप आर्धधातुके' इति सूत्रं सपदकृत्यसहितं सोदाहरणञ्च प्रस्तूयताम्।
5. 'एकस्मान् ङञणवटाः -0 इति कारिकां प्रपूर्य स्वग्रन्थोक्तदिशा विविच्यताम्।
6. 'वृद्धिरादैच्' इति सूत्रं काशिकामधिकृत्य विविच्यताम्।

## (उपखण्डः-द्वितीयः)

**सूचनाः** लघूत्तराणां प्रश्नानाम् अस्मिन्नुपखण्डे त्रयः संस्कृतगद्यांशाः दत्ताः सन्ति। तत्र द्वयोः संस्कृतगद्यांशयोः हिन्दीभाषया संस्कृतेन वा व्याख्या करणीया। प्रत्येकं गद्यांशस्य कृते पञ्च अङ्काः निर्धारिताः सन्ति। (2×5=10)

7. क- अथ किमर्थो वर्णानामुपदेशः? प्रत्याहारार्थः। प्रत्याहारो लाघवेन शास्त्रप्रवृत्यर्थः।। अइउण्।। मा.सू.।। अ इ उ इत्यनेन क्रमेण वर्णानुपदिश्यान्ते णकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवत्येकेन 'उरण् रपरः' इत्यकारेण। ह्रस्वमवर्णं प्रयोगे संवृतम्, दीर्घप्लुतयोस्तु विवृतत्वम्। तेषां सावर्ण्यप्रसिद्ध्यर्थमकार इह शास्त्रे विवृतः प्रतिज्ञायते। तस्य प्रयोगार्थम् 'अ अ' इति शास्त्रान्ते प्रत्यापत्तिः करिष्यते।।

ख- प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न।
आचारादप्रधानत्वाल्लोपश्च बलवत्तरः।।

ग- 'लण्।। मा.सू.।। 'ल' इत्येकं वर्णमुपदिश्य पूर्वाश्चान्ते णकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवति त्रिभिः 'अणुदित्सवर्णस्य चाप्रत्ययः इत्यकारेण 'इण्कोः' इतीकारेण 'इको यणचि' इति यकारेण। इण्ग्रहणानि सर्वाणि परेण णकारेण। अण्ग्रहणानि तु पूर्वेण, 'अणुदित्सवर्णस्य चाप्रत्ययः' इत्येतदेवैकं परेण।

## खण्डः-स

## (अतिलघूत्तराः प्रश्नाः)

**सूचना :** 'स' खण्डे चत्वारः अतिलघूत्तराः प्रश्नाः दत्ताः सन्ति। प्रत्येकं प्रश्नस्य कृते एकैकोऽङ्को निर्धारितोऽस्ति। एतस्य खण्डस्य सर्वे प्रश्नाः अनिवार्याः सन्ति। (04×1=04)

1. वर्णसमाम्नाये उपदिष्टोऽपि हकारः किमर्थं i|u#ifn'यते?
2. 'का नाम परिभाषा' ?
3. घुप्रदेशाः प्रतिपादनीयाः ?
4. घप्रदेशाः विवेचनीयाः ?

---------------x---------------